Register Number:

Date:

# ST. JOSEPH'S UNIVERSITY BANGALORE-27
## B.Sc. B.A. B.COM - II SEMESTER
## SEMESTER EXAMINATION: MAY 2023
## SA 221 – SAMSKRIT

**Time- 2 hrs** **Max Marks-60**

**I. एकवाक्येन संस्कृतभाषया लिखत ।** **12×1=12**

अ. रघुवंशे कति सर्गाः सन्ति?

आ. दिलीपस्य पत्नी का?

इ. कामधेनोः पुत्री का?

ई. वरतन्तुमुनेः शिष्यः कः?

उ. कौत्सः रघोः समीपे कियत् गुरुदक्षिणां पृष्टवान्?

ऊ. रघोः पुत्रः कः?

ऋ. जगतः पितरौ कौ?

ॠ. कः राजेन्दुः?

ऌ. कुम्भोदरः कस्य वृक्षस्य रक्षणं करोति स्म?

ए. कः यज्ञाश्वस्य अपहरणं कृतवान्?

ऐ. विश्वजित् यागं केन आचरितम्?

ओ. विदर्भदेशस्य राजा कः?

औ. दिलीपः नन्दिन्याः सेवां कति दिनानि आचरितवान्?

**II. श्लोकानाम् अन्वय-अन्वयार्थ-तात्पर्यं च लिखत । 3×6=18**

2. अथवा कृतवाग्द्वारे वंशेऽस्मिन् पूर्वसूरिभिः।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गति॥

अं. तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः।
दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव॥

अः प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः॥

क. मन्दः कवियशः प्रार्थी गमिष्याम्युपहास्यताम्।
प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः॥

**III. सविस्तरेण लिखत । 2×10=20**

3. रघुवंशस्य प्रथमसर्गमधिकृत्य लिखत।
4. पञ्चमसर्गमधिकृत्य लिखत।
5. श्रीहर्षस्य देश-काल-कृतिमधिकृत्य लिखत।

**IV. परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

कस्मिंश्चित् ग्रामे एका विडाली अवसत्। सा प्रतिदिनं बहून् मूषकान् अभक्षत्। एवं स्वविनाशं दृष्ट्वा मूषकाः स्वप्राणरक्षार्थम् एका सभाम् आयोजितवन्तः। सभायां मूषकाः इमं निर्णयम् अकुर्वन् यत् यदि विडाल्याः ग्रीवायां घण्टिकाबन्धनं भविष्यति तदा तस्याः नादं श्रुत्वा वयं स्वबिलं गमिष्यामः। एवं श्रुत्वा तेषु मूषकेषु एकः वृद्धः मूषकः किञ्चित् विचारयन् तान् अपृच्छत्-“कः तस्याः ग्रीवायां घण्टिकाबन्धनं करिष्यति?” तदानीम् एव विडाली आगता। तां दृष्ट्वैव सर्वे मूषकाः स्वबिलं पलायिताः।

**प्रश्नाः 5×2=10**

ख.) मूषकाः किम् आयोजितवन्तः?
ग.) सभायां मूषकाः किं निर्णयं कृतवन्तः?
घ.) वृद्धः मूषकः किम् अचिन्तयत्?
ङ.) बिडालीं दृष्ट्वा सर्वे मूषकाः किं कृतवन्तः?
च.) गद्यांशस्य शीर्षकं लिखत।